# Anatmashrivigarhanam

# અનાત્મશ્રીવિગર્હણમ્

## Document Information

Text title : anAtmashrIvigarhaNam

File name : anatmashrivigarhanam.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi ganapathy kottur kv_ganapathy at yahoo.co.uk

Proofread by : Sunder Hattangadi

Latest update : November 7, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 7, 2020

*sanskritdocuments.org*

# અનાત્મશ્રીવિગર્હણમ્

લબ્ધા વિદ્યા રાજમાન્યા તતઃ કિં
પ્રાપ્તા સમ્પત્પ્રાભવાઢ્યા તતઃ કિમ્ ।
ભુક્તા નારી સુન્દરાઙ્ગી તતઃ કિમ્
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧॥

કેયૂરાદ્યૈર્ભૂષિતો વા તતઃ કિં
કૌશેયાદ્યૈરાવૃતો વા તતઃ કિમ્ ।
તૃપ્તો મૃષ્ટાન્નાદિના વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૨॥

દૃષ્ટા નાના ચારુદેશાસ્તતઃ કિં
પુષ્ટાશ્ચેષ્ટા બન્ધુવર્ગાસ્તતઃ કિમ્ ।
નષ્ટં દારિદ્ર્યાદિદુઃખં તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૩॥

સ્નાતસ્તીર્થે જહ્નુજાદૌ તતઃ કિં
દાનં દત્તં દ્વ્યષ્ટસંખ્યં તતઃ કિમ્ ।
જપ્તા મન્ત્રાઃ કોટિશો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૪॥

ગોત્રં સમ્યગ્ભૂષિતં વા તતઃ કિં
ગાત્રં ભસ્માચ્છાદિતં વા તતઃ કિમ્ ।
રુદ્રાક્ષાદિઃ સંધૃતો વા તતઃ કિમ્
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૫॥

અન્નૈર્વિપ્રાસ્તર્પિતા વા તતઃ કિં
યજ્ઞૈર્દેવાસ્તોષિતા વા તતઃ કિમ્ ।
કીર્ત્યા વ્યાપ્તાઃ સર્વલોકાસ્તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૬॥

કાયઃ ક્લિષ્ટશ્ચોપવાસૈસ્તતઃ કિં
લબ્ધાઃ પુત્રાઃ સ્વીયપત્ન્યાસ્તતઃ કિમ્ ।
પ્રાણાયામઃ સાધિતો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૭॥

યુદ્ધે શત્રુર્નિર્જિતો વા તતઃ કિં
ભૂયો મિત્રૈઃ પૂરિતો વા તતઃ કિમ્ ।
યોગૈઃ પ્રાપ્તાઃ સિદ્ધયો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૮॥

અબ્ધિઃ પદ્ભ્યાં લઙ્ઘિતો વા તતઃ કિં
વાયુઃ કુમ્ભે સ્થાપિતો વા તતઃ કિમ્ ।
મેરુઃ પાણાવુદ્ધૃતો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૯॥

ક્ષ્વેલઃ પીતો દુગ્ધવદ્વા તતઃ કિં
વહ્નિર્જગ્ધો લાજવદ્વા તતઃ કિમ્ ।
પ્રાપ્તશ્ચારઃ પક્ષિવત્ખે તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૦॥

બદ્ધાઃ સમ્યક્પાવકાદ્યાસ્તતઃ કિં
સાક્ષાદ્વિદ્ધા લોહવર્યાસ્તતઃ કિમ્ ।
લબ્ધો નિક્ષેપોઽઞ્જનાદ્યૈસ્તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૧॥

ભૂપેન્દ્રત્વં પ્રાપ્તમુર્વ્યાં તતઃ કિં
દેવેન્દ્રત્વં સમ્ભૃતં વા તતઃ કિમ્ ।
મુણ્ડીન્દ્રત્વં ચોપલબ્ધં તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૨॥

મન્ત્રૈઃ સર્વઃ સ્તમ્ભિતો વા તતઃ કિં
બાણૈર્લક્ષ્યો ભેદિતો વા તતઃ કિમ્ ।
કાલજ્ઞાનં ચાપિ લબ્ધં તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૩॥

કામાતઙ્કઃ ખણ્ડિતો વા તતઃ કિં

કોપાવેશઃ કુણ્ઠિતો વા તતઃ કિમ્ ।
લોભાશ્લેષો વર્જિતો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૪॥

મોહધ્વાન્તઃ પેષિતો વા તતઃ કિં
જાતો ભૂમૌ નિર્મદો વા તતઃ કિમ્ ।
માત્સર્યાર્તિર્મીલિતા વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૫॥

ધાતુર્લોકઃ સાધિતો વા તતઃ કિં
વિષ્ણોર્લોકો વીક્ષિતો વા તતઃ કિમ્ ।
શંભોર્લોકઃ શાસિતો વા તતઃ કિં
યેન સ્વાત્મા નૈવ સાક્ષાત્કૃતોઽભૂત્ ॥ ૧૬॥

યસ્યેદં હૃદયે સમ્યગનાત્મશ્રીવિગર્હણમ્ ।
સદોદેતિ સ એવાત્મસાક્ષાત્કારસ્ય ભાજનમ્ ॥ ૧૭॥ var સ એવાત્મ
અન્યે તુ માયિકજગદ્ભ્રાન્તિવ્યામોહમોહિતાઃ ।
ન તેષાં જાયતે ક્વાપિ સ્વાત્મસાક્ષાત્કૃતિર્ભુવિ ॥ ૧૮॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
અનાત્મશ્રીવિગર્હણપ્રકરણં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com
Also ganapathy kottur kv_ganapathy@yahoo.co.uk

*Anatmashrivigarhanam*
pdf was typeset on November 7, 2020

Please send corrections to *sanskrit@cheerful.com*